# AtmopadeshaH

# આત્મોપદેશઃ

## Document Information

Text title : AtmopadeshaH

File name : AtmopadeshaH.itx

Category : misc, advice, aShTaka

Location : doc_z_misc_general

Author : Durgaprasad DvivedI

Transliterated by : Lalitha Mallikarjunan

Proofread by : Lalitha Mallikarjunan, Kamini Viswanathan

Latest update : December 10, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 6, 2021

*sanskritdocuments.org*

# આત્મોપદેશઃ

શાસ્ત્રપ્રતિષ્ઠા ગુરુવાક્યનિષ્ઠા
સદાત્મદૃષ્ટિઃ પરિતોષપુષ્ટિઃ ।
ચતસ્ર એતા નિવસન્તિ યત્ર
સ વર્તમાનોઽપિ ન લિપ્યતેઽઘૈઃ ॥ ૧॥

ઉદ્દેશ્ય ભેદેન વિધેયભેદે
શાસ્ત્રાણ્યનેકાનિ ભવન્તિ તાવત્ ।
તત્રાસ્તિકૈરાદ્રિયમાણમેવ
વિભાવનીયં પરમાર્થસિદ્ધ્યૈ ॥ ૨॥

વ્યાખ્યાવલેનાભિનિવેશભાજા
પ્રમેયભેદો બહુધાભ્યુદેતિ ।
તત્રાસ્તિ માત્સર્યકલઙ્કમુક્તા
મુક્તાવદાતા ધિષણા પ્રમાણમ્ ॥ ૩॥

તર્કોઽપ્રતિષ્ઠઃ શ્રુતયો વિભિન્ના
નૈકો ઋષિર્યસ્ય મતં પ્રમાણમ્ ।
ધર્મસ્ય તત્વં નિહિતં ગુહાયાં
મહાજનો યેન ગતઃ સ પન્થાઃ ॥ ૪॥

અનેક શાસ્ત્રાર્થવિમર્શનેન
તત્તન્મહાવ્યક્તિનિદર્શનેન ।
ત્રૈકાલિકજ્ઞાનવિકસ્વરેષુ
મહાજનત્વં ગુરુષૂપદિષ્ટમ્ ॥ ૫॥

યદેતકત્પુત્રકલત્રમિત્ર -
વિદ્વેષ્યુદાસીનચરાચરં હિ ।
તન્નામરૂપાખ્યવિકારવર્જં
બ્રહ્મેતિ વેદાન્તવિદો વિદન્તિ ॥ ૬॥

તદાત્મરત્નં ન બહુશ્રુતેન
ન વા તપોરાશિવલેન લભ્યમ્ ।
પ્રકાશતે તત્તુ ગુરૂપ દિષ્ટ -
જ્ઞાનેન જન્માન્તરખણ્ડકેન ॥ ૭॥

જાત્યા ગુણેન ક્રિયયા ચ સમ્યગ્
ગતપ્રમાદો વિદધદ્વિધેયમ્ ।
લભેત યત્તેન સદૈવ તુષ્યન્
યતેત ભાગ્યાર્પિતકાર્યકાયઃ ॥ ૮॥

નિષ્કામચિત્તેન કિલૈકતાનઃ
પરામૃશન્વસ્તુ ગુરૂપદિષ્ટમ્ ।
ઉદારભાવો રચયેત સૌખ્યં
પરં પરેષામપિ કિં સ્વનિષ્ઠમ્ ॥ ૯॥

ઇતિ શ્રીદુર્ગાપ્રસાદદ્વિવેદીવિરચિતઃ આત્મોપદેશઃ સમ્પૂર્ણઃ ॥

Encoded by Lalitha Mallikarjunan
Proofread by Lalitha Mallikarjunan, Kamini Viswanathan

*AtmopadeshaH*
pdf was typeset on February 6, 2021

Please send corrections to *sanskrit@cheerful.com*